दिनाङ्कः - 31.12.2024 सायम् - 06:20

**मुख्यवार्ताः**

- विज्ञान-प्रौद्यौगिकी-मन्त्रिणा डॉ. जितेन्द्रसिंहेन स्पैडेक्स इत्यस्य सफलप्रक्षेपणाय इसरो इत्यस्य वैज्ञानिकानां भूरिशः प्रशंसा कृता।
- विदेशमन्त्री डॉ एस्. जयशङ्करः अवोचत् यत् क्वाड्इति शिखरसम्मेलनं हिन्द प्रशान्त क्षेत्रस्य स्थिरतायै प्रगतये समृद्धये च एकेन महत्वपूर्णशक्तित्वेन विराजते।
- विदेशमन्त्रालयेन ख्यापितं यत् यमनदेशे निवसत्यै भारतीय-परिचारिकायै यमनप्रशासनेन श्रावितस्य मृत्युदण्डस्य प्रसङ्गे केन्द्र-प्रशासनं सर्वविधप्रयासाय आश्वासनम् प्रदत्तवत् ।
- पञ्चविंशत्युत्तरद्विसहस्रतमस्य ख्रिस्ताबदस्य स्वागताय आराष्ट्रं जनाः सज्जाताः सन्ति।
- हॉकी-इण्डिया-लीग-इत्येतस्यां प्रतिस्पर्धायाम् अद्य दिल्ली-एस.जी-पाइपर्सदलस्य सामुख्यं रात्रौ हैदराबाद-तूफान्स-इत्यनेन दलेन साकं निश्चितमस्ति।

**अन्तरिक्षसफलता**

केन्द्रीय-परमाणूर्जा-अन्तरिक्ष-राज्यमन्त्रिणा डॉ. जितेन्द्रसिंहेन उक्तं यत् निवर्तमानवर्षोऽयं भारतीय-अन्तरिक्ष-क्षेत्रस्य कृते अतीव महत्वपूर्णः आसीत्। नवदिल्ल्याम् अद्य वार्ताहरान् संबोधयन् श्रीसिंहः उक्तवान् यत् वर्षस्यास्य प्रथमदिवसः 'एक्स्पोसैट्' इत्यस्य प्रक्षेपणेन समारब्धः तदनन्तरम् आदित्य एल्-वन् इत्याभियानं तस्य लक्षित हैलो इत्याख्यायां कक्षायां स्थापितम्। पुनश्च अगस्तमासे प्रथमः राष्ट्रिय-अन्तरिक्ष-दिवसः परिपालितः ह्यश्च भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनम् इत्यनेन 'स्पेडेक्स' इत्याख्यम् अभियानम् समारब्धम्। तेनोक्तं यत् वर्षेऽस्मिन् गगनयानाभियानाय अपि एकाधिकानि परीक्षणानि विहितानि। डॉ सिंहेन प्रोक्तं यत् परीक्षणानि प्रायः सम्पूरितानि सन्ति, अग्रिमे च वर्षे कस्मिन्नपि काले एकया महिला रोबोट इत्यनया साकं अस्य पूर्वाभ्यासः विधास्यते। श्रीसिंहेन उक्तं यत् संयोजन-प्रौद्यौगिक्यै स्पैडेक्स-अभियानं भारतपक्षतः कृतेषु प्राथमिक-प्रयोगेषु एकमस्ति। श्रीजितेन्द्रसिंहेन स्पैडेक्स इत्यस्य सफलप्रक्षेपणाय वैज्ञानिकानां भूरिशः प्रशंसा कृता।

**क्वाडसम्मेलनम्**

विदेशमन्त्री डॉ एस्. जयशङ्करः अवोचत् यत् क्वाड्इति शिखरसम्मेलनं हिन्द-प्रशान्त-क्षेत्रस्य स्थिरतायै प्रगतये समृद्धये च एकेन महत्वपूर्णशक्तित्वेन विराजते। एकस्मिन् सामाजिकान्तर्जालीय-सन्देशपटले डॉ. जयशङ्करः जापानदेशीयेन विदेशमन्त्रिणा ताकेशी-इवाय-इत्यमुना अमरिकादेशीयेन च विदेशमन्त्रिणा एण्टनी-ब्लिंकन-इत्यनेन सह मिलित्वा अस्य क्षेत्रस्य आवश्यकतां प्रपूरयितुं प्रतिबद्धताम् उररीकृतवान्। क्वाड्इत्येत्स्य विंशतितमे वार्षिकसम्पूर्त्यवसरे क्वाड्इत्यस्य विदेशमन्त्रिणाम् एकस्मिन् संयुक्तोपवेशनस्य वक्तव्ये अभिहितं यत् आपदुद्धारकार्याणाम् आपत्कालिक-प्रतिक्रियायाः कार्यम् अधुना एकस्मिन् पूर्णसहभागे परिवर्तितम्। अपि च इदम् सूच्यते यत् क्वाड्समूहस्यः देशाः सम्प्रति हिन्दप्रशान्तक्षेत्रस्य सहभागिभिः देशैः सह ऐक्यभावनया सह कार्यं विधास्यन्ति। अवधेयास्पदं वर्तते यत् क्वाड्समूहस्य देशाः ऋतुदशापरिवर्तन-कर्करोग-महामारी-इत्येतान् विषयान् आतङ्कवाद-आन्तर्जालिकापराध-सदृशेषु समाह्वानेषु ध्यानकेन्द्रितं कुर्वन्ति। एतस्मिन् सामूहिकवक्तव्ये प्रख्यापितं यत् चतुर्भिः देशैः सुनामी इत्यस्मात् सागरीयझञ्झावातात् प्रभावितानां लक्षशः जनानां सहायतायै हिन्दप्रशान्तक्षेत्रे चत्वारिंशत्सहस्राधिकं आपत्कालिक-प्रतिक्रियादलस्य अन्येषां सहयोगिनां च योगदानं प्रदत्तम्। ध्यातव्यमस्ति यत् क्वाड्इति चतुर्णां

देशानां एक: समूह: विद्यते यस्मिन् ऑस्ट्रेलिया-भारत-जापान-अमरीका-देशा: समाविष्टा: सन्ति। अनेन समूहेन चतुरधिकद्विसहस्र-तमवर्षे हिन्दप्रशान्त-क्षेत्रे भूकम्प-सुनामी-इत्येताभ्यां प्रभावित-जनानां साहाय्यार्थं पारस्परिकरूपेण कार्यं विहितमासीत्।

**विदेशमन्त्रालय:**

विदेशमन्त्रालयेन ख्यापितं यत् यमनदेशे निवसत्यै भारतीय-परिचारिकायै निमिशाप्रियायै यमनप्रशासनद्वारा श्रावितस्य मृत्युदण्डस्य प्रसङ्गे केन्द्र-प्रशासनं सर्वविधप्रयासं करिष्यति। एतस्मिन् प्रसङ्गे वार्ताहराणां प्रश्नानां प्रत्युत्तरे विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवाल: सूचितवान् यत् प्रशासनं यमनस्य घटनया परिचितमस्ति। तेन अग्रे निगदितं यत् मन्त्रालय: विजानाति यत् सुश्री-प्रियाया: परिवार: प्रासङ्गिक-विकल्पान् अपि अन्वेषयति। सञ्चारमाध्यमानुसारि सुश्रीप्रिया केरलवास्तव्यास्ति अपि च यमनदेशे हत्याया: अपराधे दण्डितास्ति।

**नववर्ष:**

पञ्चविंशत्युत्तरद्विसहस्रतमस्य ख्रिस्ताबदस्य स्वागताय आराष्ट्रं जना: सन्नद्धा: सन्ति। नववर्षस्य पूर्वसन्ध्यायां मार्गा: सम्मर्दयुता: उत्सवस्थलानि, पाकस्थलानि च जनाधिकानां स्वागतोत्सुकानि प्रतीयन्ते। राष्ट्रस्य राजधान्यां दिल्लीति-महानगरे यातायात-आरक्षिविभागेन यातायात-सम्बद्धा विज्ञप्ति: निस्सारिता। यातायात-आरक्षिविभागस्य अतिरिक्त-महानिदेशकेन गुप्ता-दिनेशकुमारेण उक्तं यत् नियन्त्रात्मक-दिङ्निर्देशा: अद्य रात्रौ अष्टवादनत: पालनीया: भविष्यन्ति। कनॉट-प्लेस इत्यस्य समवर्तिषु क्षेत्रेषु सर्वविधवाहनानां तावन्निषेधो वर्तते यावन्न वर्षारम्भोत्सव: समाप्तिं न गच्छेत्। तेनोक्तं यत् नववर्षस्य उत्सवं ध्यात्वा आरक्षिणां सक्रिया सन्नद्धाता नवदिल्ली-इण्डिया-गेट-सहित-समवर्तिषु क्षेत्रेषु अपि भविष्यति। हिमाचलप्रदेशोऽपि नववर्षस्य स्वागताय सर्वविधसन्नद्धता-पुरस्सरं स्थितोऽस्ति। सम्प्रति हिमपातकालत्वात् अत्यधिकसंख्यायां जना: तत्र पर्यटनाय गन्तुकामा: सन्ति। फलत: यातायातावरोध: शिमला-मनालीत्यादिषु क्षेत्रेषु प्राचुर्येण दृश्यते। एतन्मध्ये पुदुच्चेरी अपि स्वकीयेषु समुद्रतटेषु यात्रीणां स्वागताय सन्नद्धास्ति। आराष्ट्रात् सहस्रश: जना: अस्योत्सवस्य परिपालनाय विभिन्नानि स्थलानि यावत् जिगमिषन्त: प्रतीयन्ते। उत्तराखण्डोऽपि ख्रिस्तीय-नववर्षस्य स्वागताय पर्यटकानाञ्च अभिवादनाय सन्नद्धद्भूतोऽस्ति।

**ऋतविभाग:**

भारतीयऋतुविज्ञानविभागेन अद्य ओडिशा-असम-पश्चिम-बङ्गाल-सिक्किम-मेघालय-मणिपुर-नागालैण्ड-त्रिपुरा-राज्येषु कुज्झटिका अनुमानिता। आगमिषु त्रिषु दिवसेषु पञ्जाब-हरियाणा-उत्तराखण्ड-उत्तरप्रदेश-राजस्थान-हिमाचलप्रदेशेष्वपि तादृशी स्थिति: अनुमीयते। ऋतुविज्ञान-विभागानुसारं जम्मूकश्मीर-लद्दाख-हिमाचलप्रदेशेषु अद्य शीतलहरी अनुभूता। साप्ताहान्तं यावत् जम्मूकश्मीरे हिमवृष्टि: अपि च उत्तरपश्चिमभारते मध्यमस्तरीया वृष्टि: अनुमानितास्ति।

**आयकरप्रत्यावर्तनम्**

केन्द्रीय-प्रत्यक्षकरमण्डलेन निवर्तमानाय वित्तवर्षाय विलम्बितं संशोधितञ्च आयकर-प्रत्यावर्तनस्य तिथि: जनवरीमासस्य पञ्चदशदिनाङ्कपर्यन्तं अग्रेसारितास्ति। इत: पूर्वं करदातृभ्य: विलम्बितानां संशोधितानाञ्च आयकर-विवरणपत्राणां प्रतिवेदनस्य अद्य अन्तिम: दिवस: आसीत्।

## दिल्लीविधानसभा-आरोपः

विधानसभानिर्वाचनात्प्राक् दिल्ल्यां राजनीतिकसमराङ्गणः सजवतां भजते। यतो हि भाजपेतिदलेन आम-आदमी-पार्टीति प्रशासनम् आरोपयत् भित्तिफलकानि संश्लेषितानि । भाजपेति दलमुख्यालयात् बहिः प्रचारफलकेषु आपदलस्योपरि नगरे भ्रष्टाचार दुःशासनयोः आरोपाः समारोपिताः सन्ति । भाजपेतिदलेन दिल्ल्यां सत्तारुढ़े दले वायुप्रदूषणम् कथितरूपेण प्रतिकूल- स्वास्थ्य सौविध्यम्, जलसङ्कटादिभिः सह अन्येषु विषयेष्वपि आक्षेपाः सन्ति समारोपिताः । एतन्मध्ये भाजपादल-प्रवक्त्रा गौरव भाटिया इत्यनेन राष्ट्रिय मानवाधिकारपक्षतः आतिशी - अरविन्दयोः एक्स-मध्ये सम्प्रेषितयोः सन्देशयोः अपसारणादेशादनन्तरं प्रत्यारोपयता उक्तं यत् राजनीतिक- अभियानादिषु बालानां प्रयोगः कृतः इति ।

## हॉकीतिप्रतिस्पर्धा

हॉकी-इण्डिया-लीग-इत्येतस्यां प्रतिस्पर्धायाम् अद्य दिल्ली-एस.जी-पाइपर्सदलस्य सामुख्यं राउरकेलायां रात्रौ हैदराबाद-तूफान्स-इत्यनेन दलेन साकं निश्चितमस्ति। अस्याः प्रतिस्पर्धायाः प्रसारणं रात्रौ सपादाष्टवादने भविष्यति।

॥इति वार्ताः॥